Postal Regd.No. GAMC- 1553/2022-2024

ISSN 2454-6313

संस्कृत-
# साम्प्रतम्
(Sampratam means "Current")

(संस्कृतमासिकी पत्रिका)
वर्ष : १८ अङ्क : २०५
जून - २०२३

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2022-2024 issued by SSP Ahmedabad. Valid upto 31-12-2024. containing 8 pages ₹ 10

**धन्यवादः... संस्कृतसाम्प्रतं पत्रिका सप्तदशवर्षेभ्यः प्रतिमासं संस्कृताभिमानिनां सेवायां प्रकाश्यते । संस्कृताभिमानिनां भवतां सहयोगेन सरस्वतीमातुः कृपया च पत्रिकायाः यात्रा अष्टादशे वर्षे आरभ्यते । एतस्मिन् प्रसङ्गे वयं ग्राहकानां सहयोगिनां च ऋणं स्वीकुर्मः धन्यवादाश्च व्याहरामः। सम्पादकः**

## चिन्तनम्

सतीशः गज्जर्

### अपूर्णं शिल्पम् – विवाहः

ब्रह्मणा कृता स्त्रीपुरुषयोः निर्मितिः काचित् कलाकृतिः इव धरातले शोभते । ततः एव विविधानां काव्यानां रचना अभवत् । स्त्रीणां पुरुषाणां च विविधाः चेष्टाः अपि सांसारिकाः अलङ्काराः एव । रसिकजनेभ्यः एतत् सर्वं रोचते । यस्मिन् समाजे रसिकजनानां सङ्ख्या अधिका भवति सः समाजः प्रायः स्वस्थः भवति । सामाजिकस्य स्वास्थ्यस्य आधारः रसः अस्ति । स्त्री–पुरुषयोः परस्परं दिव्यम् आकर्षणम् अपि रसेन प्रतिष्ठां प्राप्नोति। सः रसः नितरां शुष्कं जीवनं पल्लवितं करोति। ईश्वरेण मनुष्याय एतत् सर्वं प्रदत्तम्। ईश्वर ! धन्यवादः !!

एवमेव वर्तते चेत् मनोभङ्गः कलहः वा किमर्थम् ? तस्य मूलं कुत्र निगूढम् अस्ति ? वस्तुतः ब्रह्मणा स्त्री–पुरुषयोः निर्माणं कृतम्, न तु भर्तुः भार्यायाः च ! पुनः सावधानाः भवन्तु भवन्तः। विशेषतः ज्ञातव्यं यत् ब्रह्मा पुरुषं निर्मितवान्, पतिं नैव । तथैव सः स्त्रीं निर्मितवान्, पत्नीं नैव । प्रजोत्पत्तेः निर्माणं भगवता कृतम्, परन्तु विवाहस्य निर्माणं मनुष्यैः कृतम् । मनुष्यः अपूर्णः शिल्पी अस्ति। अतः तस्य शिल्पम् अपि पूर्णतः गुणसम्पन्नं न भवति । वाक्यभेदेन वक्तुं शक्यते यत् रसः ईश्वरेण दत्तः उपहारः अस्ति, परन्तु गृहस्थजीवनं बुद्धिमद्भिः निर्मितं मृण्मयं भवनम् अस्ति। रसः गुणवान् अस्ति – आत्मसंतृप्तिकरः अस्ति। भवनं सुन्दरम् अस्ति, तथापि क्षणभङ्गुरम् अस्ति। दम्पत्योः कलहस्य मूले एषा मानवनिर्मिता व्यवस्था वर्तते। अतः एव विवाहस्य वैशिष्ट्येन सह तस्य मर्यादा अपि ज्ञातव्या। बहुत्र विवाहः शृङ्खलायाः कार्यं करोति। सा शृङ्खला कुत्रचित् स्वर्णमयी भवति। तदा मूढः समाजः चिन्तयति – एते सुखिताः सन्ति।

वयं विवाहव्यवस्थां सपदि परिवर्तयितुं – परिहर्तुं वा न शक्नुमः । कः उपायः ? एतां व्यवस्थां स्नेहेन (रसेन) मिश्रयितुं शक्नुमः । वैवाहिकं जीवनं मनुष्याय स–रसं जीवितुम् अवसरम् अपि ददाति । परन्तु तदर्थं विशिष्टं ज्ञानं न ददाति। तत् तु मनुष्येण एव सम्पादनीयम्।

# विवेकानन्दः क्रूरजन्तवः च

स्वामी विवेकानन्दः (१८६२-१९०२) रामकृष्णपरमहंसस्य शिष्येषु प्रमुखः आसीत्। तदीयं पूर्वाश्रमीयं नाम नरेन्द्रनाथः इति । आध्यात्मिकमार्गेण भारतस्य जागरणं सः स्वस्य जीवितस्य लक्ष्यं कृतवान् आसीत् । शिकागोनगरे (१८९३) धर्मसंसदि तेन कृतम् अपूर्वं भाषणं जगद्विख्यातं जातम्। सः भारतस्य वैशिष्ट्यं विदेशीयं जगत् ज्ञापयितुम् अपि प्रयासं कृतवान्।

गुरुवर्यस्य रामकृष्णपरमहंसस्य दिवङ्गतेः अनन्तरं विवेकानन्दः तदीयान् सन्देशान् सर्वत्र प्रसारयितुं देशे प्रवासं कृतवान्। कदाचित् सः वाराणस्यां निर्जनेन मार्गेण गच्छन् आसीत्। तदा कश्चन धृष्टानां वानराणां गणः तम् अन्वसरत्। सः गमनवेगम् अवर्धयत्। वानराः अपि वेगेनैव तम् अनुसृतवन्तः यदा तेन धावितं तदा ते अपि अनुसृत्य धावितवन्तः । विवेकानन्द-वानरगणयोः मध्ये स्थितम् अन्तरं क्षणे क्षणे न्यूनीभवत् आसीत्। तावता मार्गपार्श्वे उपविष्टः कश्चन संन्यासी उच्चस्वरेण अवदत् - "मा धाव! तान् धृष्टान् सम्मुखीकुरुष्व" इति।

विवेकानन्दः झटिति धावनं स्थगितवान्। वानराः तत्समीपम् आगताः एव। विवेकानन्दः तान् तीक्ष्णदृष्ट्या अपश्यत् धैर्येण। एतस्मात् भीताः ते वानराः सर्वे ततः पलायितवन्तः क्षणाभ्यन्तरे एव।

न्यूयोर्कनगरे एतां घटनाम् उदाहरन् स्वामी विवेकानन्दः अवदत् - "मया इतः उत्तमः पाठः पठितः - अपायः धैर्येण सम्मुखीकरणीयः इति । वयं यदि समस्यातः दूरं गच्छेम तर्हि वानराः इव ताः अपि अस्मान् अनुसरिष्यन्ति। ततः विमुक्तिः प्राप्तव्या चेत् आदौ आत्मा जेतव्यः। अस्माभिः कष्टानि धैर्येण सम्मुखीकरणीयानि। धीरः एव जीवति। कापुरुषः जीवने किमपि साधयितुं न अर्हति" इति।

विवेकानन्दः यथा बुद्धिमान् तथैव धीरः अपि । सत्त्ववान् सः भीतिं सर्वथा न जानाति स्म । देशस्य भव्योदर्कविषये सः आशावान् आसीत् एव सर्वदा । तथापि अत्रत्यानां स्वार्थपरतां देशस्य दुरवस्थां च मनसि आकलयता तेन कदाचित् महान् विषादः प्राप्तः। विषण्णमनस्कः सः अरण्यं प्राविशत्। आहारसेवन- चिन्ताम् अपि अकुर्वन् सः समग्रं दिनं निरुद्देशम् अरण्ये अटितवान्। किमर्थं जीवनीयम् इति प्रश्नः तं बाधते स्म । अटनात् चिन्ताभरतः च श्रान्तः सः कस्यचित् वृक्षस्य अधः उपाविशत्। सूर्यः अस्तं गतः । तत्र सर्वत्र अन्धकारः प्रसृतः । अन्धकारे तेन प्रकाशमाने उभे नेत्रे दृष्टे। कश्चन क्रूरः व्याघ्रः गुल्मतः निर्गत्य तस्य समीपम् आगच्छत्।

एतत् दृष्ट्वा विवेकानन्दः किं पलायनसूत्रं पठितवान्? अथवा प्राणरक्षणाय सः वृक्षम् आरोहत्? न। सः शान्ततया निश्चलतया च तत्रैव उपाविशत् - 'अहं यदि एतस्य आमिषत्वं प्राप्नुयां तर्हि तत् मम परमं सौभाग्यम् एव' इति चिन्तयन्। अन्तिमः क्षणः आसन्नः इति भावयन् सः देवध्यानम् अकरोत्।

सः क्रूरः व्याघ्रः सकृत् तीक्ष्णदृष्ट्या तम् अपश्यत्, मन्दं ततः निरगच्छत् च। अनन्तरम् अपि विवेकानन्दः ततः न उत्थितः। तेन चिन्तितं यत् अचिरात् एव खादनेच्छां प्राप्य सः व्याघ्रः सपरिवारं पुनः अपि आगच्छेत् इति। किन्तु तस्य चिन्तनस्य अनुगुणं व्याघ्रः तु पुनः न आगतः एव।

आर्योक्तिः वदति यत् यदि अस्मासु भीतिः न भवति तर्हि भीतेः कारणानि स्वयम् एव अपगच्छन्ति।

डॉ. वासुदेवः पाठकः 'वागर्थः'

## प्रहेलिकाः

ऋणी कस्य सदा रामः ? कीदृशी स्यात् सतां मतिः ?
का निर्णयात्मिका कार्या ? **मारुतेः मङ्गला मतिः ॥**

नर्मदायाश्च किं नाम ? प्रकृतिः कीदृशी सदा ?
गुरु-सेवा कथं प्रार्थ्या ? **रेवा रम्या समन्ततः ॥**

कीदृशी शारदा माता ? कदा सेव्यश्च सद्गुरुः ?
गीता ज्ञाने कथं ज्ञेया ? **सार-दा सर्वदा वरा ॥**

रामायणे कथा कस्य ? का पूज्या सादरं जनैः ?
कीदृशी स्यात् सतां वत्तिः ? **रामस्य जानकी शुभा ॥**

दिने प्रकाशते कश्च ? दाता भवति कीदृशः?
कदा वरा मता भक्तिः ? **मिहिरः कोमलः सदा ॥**

प्रभोः किं प्रथमं नाम ? मन्त्रश्च कः परो मतः ?
कश्च कल्याणदः श्रेष्ठः ? **ॐकारः प्रणवः शिवः ॥**

कुत्र सज्जनता सेव्या ? कदा श्रद्धा फलान्विता ?
किं प्राप्यते शुभे कार्ये ? **सर्वत्र सर्वदा शुभम् ॥**

बुद्धिमान् किं त्यजेत् शीघ्रम् ? सुज्ञः दुष्टं करोति किम् ?
कः सुखी जीवने नित्यम् ? **गर्वं त्यजति बुद्धिमान् ॥**

त्याज्यं किं सर्वथा लोके ? कदा सज्जन-सेवनम् ?
दुष्टसङ्गस्य किं कार्यम् ? **अभद्रं सर्वदा हेयम् ॥**

वृषभानोस्सुता कास्ति ? कश्चास्ति पार्थसारथिः ?
कार्या सेवा कथं नित्यम् ? **राधा कृष्णश्च भावतः ॥**

पद्येषु, चरण(पाद)त्रये प्रश्नाः । चतुर्थे पादे प्रश्न-त्रयस्य उत्तराणि । बहुधा, चतुर्थे पादे शब्दानां तथा आयोजनं क्रियते, यथा कापि सूक्तिः भवति ।

## रामदासः

**रा**मदास्सदैवाहम्
**म**नसा कर्मणा तथा ।
**दा**शरथिं विभुं वन्दे
**स**स्सत्त्वेन समायुतः ॥

## सोमनाथः

**सो**मनाथं वरं पुण्यम्
**म**हादेवं प्रधानतः ।
**ना**ट्यप्रियं नटेशं च
'**थ**'वत् स्थिरं भजेन्मुदा ॥
थ – पर्वतः,

## कालिदासः

**का** सारस्वतसारेण
**लि**प्ता, येन वरा कृता ।
**दा**क्ष्यं यस्य प्रशस्यं च
**स**स्सदा राजते कविः ॥
का – पृथ्वी

## रामचन्द्रः

**रा**घवो राजते राज्ये
**म**नःपूतं समाचरन् ।
**च**न्द्रवद् भक्तभक्तार्थम्
**द्र**वमाणं भजेद् वरम् ॥

एतेषु श्लोकेषु, सर्वेषां चरणानां प्रथमाक्षराणां संयोजनेन, कोऽपि विशिष्टः शब्दः, कस्यचित् वा नामाभिधानं भवति ।

## अविमारकम् ( ग्रन्थपरिचयः )

व्योम शाहः

( अनुवर्तते)

एतावता अङ्कद्वये अस्माभिः दृष्टं यत् कुन्तिभोजः स्वकीयायाः विवाहयोग्यायाः कन्यायाः कृते वरम् अन्विष्यति। तदैव सः मत्तगजस्य प्रहारस्य विषये ज्ञापितः। राजा रक्षकस्य तस्य पुरुषस्य (अविमारकस्य) विषये ज्ञातुं मन्त्रिणे आदेशं ददाति। अविमारकः कुरङ्ग्याम् अतीव स्निह्यति। कुरुङ्ग्याः अपि सैव स्थितिः। नलिनिका अविमारकं कन्यान्तःपुरस्य रक्षिणां विषये गुप्तां सूचनां ददाति। अविमारकोऽपि प्रच्छन्नवेषेण कन्यान्तपुरं प्रविशति।

तृतीयाङ्कस्य प्रारम्भः कन्यान्तःपुरे कुरङ्गी मागधिका विलासिनी इत्येतासां संवादेन भवति। चेट्योः परस्पर-संलापेन कुरङ्गी काशिराजस्य दूतस्य विषये जानाति । तद्विषये वार्तां कर्तुम् अमात्यः प्रस्थितः इति श्रुत्वा सा व्याकुलाऽपि भवति । नलिनिका अपि तदा तमेव वृत्तान्तं निवेदयितुं कुरङ्गीं प्रति गच्छति । सर्वं वृत्तान्तं निवेद्य प्रतिनिवर्त्तिन्या तया दृष्टं यत् कोऽपि रक्षकः तत्र कन्यान्तःपुरे नियुक्तः नास्ति यतो हि अमात्यस्तु प्रस्थितः। नलिनिका मागधिका च ततः निर्गते। रात्रिः आरूढा। मध्येरात्रं खड्गं हस्ते गृहीत्वा चौरवेषेण रज्ज्वा सह अविमारकः प्रविशति। एकेन एव श्लोकेन सः तारुण्यस्य कुटिलतां वर्णयति।

**''रागं विजृम्भयति संश्रयते प्रमादं दोषान् न चिन्तयति साहसम् अभ्युपैति ।**
**स्वच्छन्दतो व्रजति नेच्छति नीतिमार्गं बुद्धिं शुभां सुविदुषाम् अवशीकरोति ॥''**

तस्य विश्वासः वर्तते यत् सर्वैः अपि साधनैः सः युक्तः, अतः सः निश्चयेन साध्यं प्राप्स्यति । अर्धरात्रे नगरस्थितिं दृष्ट्वा सः मोदते। रक्षकेभ्यः आत्मानं रक्षन् सः शनैः शनैः प्रासादं प्रविशति। उपरि आरोहणं कर्तुं सः रज्जुं क्षिपति । यथा संदिग्ध-कार्येषु वयम् ईश्वरनामस्मरणं कुर्मः, तथैव अत्रापि भासेन तादृशानि लघूनि वाक्यानि अविमारकमुखोद्गतानि स्थापितानि। तद्यथा -

''नमः प्रजापतये । नमः सर्वसिद्धेभ्यः । प्रसीदन्तु बलि-शम्बर-महाकालाः । विजृम्भतां रात्रिः । वर्धतां निद्रा। अनुमन्यतां पद्मा। लयं गताः सर्वविघ्नाः भवन्तु। हताः परिपान्थिकाः भवन्तु। जयतु भगवती कात्यायिनी।'' इत्युच्चार्य प्रथमेन एव प्रक्षेपेण रज्जुः संसक्ता। अत्र एकम् उत्तमं श्लोकम् उच्चारयति अविमारकः।


**''यत्ने कृते यदि न सिद्ध्यति कोऽत्र दोषः । को वा न सिद्ध्यति ममेति करोति कार्यम् ।**
**यत्नैः शुभैः पुरुषता भवतीह नृणां दैवं विधानम् अनुगच्छति कार्यसिद्धिः ॥**

रज्ज्वा आरोहन् राजकुलस्य शोभां दृष्ट्वा सः स्तब्धः। क्रमेण सः कन्यापुरं प्रविशति। तत्रैव सः नलिनिकां दृष्ट्वा सन्तोषम् अनुभवति। नलिनिकया अविमारकस्य कृतेऽपि शयनीयं सज्जीकृतम्। कुरङ्गी शयनं करोति स्म। अविमारक-नलिनिकयोः सम्भाषणेन सा जागरिता । किञ्चिद् व्याकुला सा नलिनिकाम् आलिङ्गतुम् आह्वयति । नलिनिका तु प्रपञ्चेन अविमारकम् एव आलिङ्गितुं प्रेषयति। आलिङ्गनकाले नलिनिकां पार्श्वस्थां स्वयं च अविमारकम् आलिङ्गिता इति ज्ञात्वा सा भीता सलज्जा च। तावति एव काले धात्री आगत्य सूचयति यत् अविमारकस्य कुरङ्ग्याश्च कृते शयनीयम् अभ्यन्तरमण्डपे रचितम्। तौ तत्रैव गच्छेताम्।

(क्रमशः... )

## मासवार्ता:

### सम्पन्नः संस्कृतग्रीष्मवर्गः





मईमासस्य १ दिनाङ्कतः ११ दिनाङ्कपर्यन्तम् एकलव्य-संस्कृत-एकेडेमीसंस्थाने संस्कृतग्रीष्मशिबिरस्य आयोजनम् अभवत्। शिबिरेऽस्मिन् Sr.Kg. तः ८ कक्ष्यायाः छात्राणां कृते बालसंस्कृतवर्गाः, दशमकक्ष्यायाः छात्राणां कृते संस्कृतव्याकरणवर्गाः च आयोजिताः। डॉ. मिहिरः उपाध्यायः, श्रीमती सङ्गीता मिस्त्री, श्रीमती अमी गोहेलः च शिक्षकत्वेन छात्रेभ्यः मार्गदर्शनं प्रायच्छन्। संस्कृतस्य अध्ययनेन छात्राः सन्तुष्टाः आसन्।

### सम्पन्नः संस्कृतग्रीष्मवर्गः



एकलव्य-संस्कृत-एकेडेमीसंस्थानस्य सहयोगेन अहमदाबादनगरे शिवानन्दाश्रमे संस्कृतग्रीष्मवर्गस्य आयोजनम् अभवत्। परमपूज्यानाम् अध्यात्मानन्दचरणानां पुण्यस्मृतिम् अधिकृत्य आयोजितेऽस्मिन् संस्कृतवर्गे २५ छात्राः संस्कृतभाषायाः अध्ययनम् अकुर्वन्। सुश्री रागिणिः गोवाडिया, सुश्री वि.भागेश्री च वर्गस्य सफलं सञ्चालनम् अकुरुताम्।

### सम्पन्नौ संस्कृतभाषाशिक्षणस्य वर्गौ

संस्कृतभाषायाः अध्ययनं कर्तुम् इच्छुकानां संस्कृतरसिकानां कृते एकलव्य-संस्कृत-एकेडेमीसंस्थानेन संस्कृतभाषाशिक्षणस्य विविधस्तरीयाः अभ्यासक्रमाः आयोज्यन्ते। अभ्यासक्रमेऽस्मिन् फरवरीमासस्य १५ दिनाङ्कतः मईमासस्य १५ दिनाङ्कं यावत् संस्कृतभाषाशिक्षणस्य प्रथमस्तरस्य तृतीयस्तरस्य च अभ्यासक्रमः प्राचलत् अभ्यासक्रमेऽस्मिन् ४२ छात्राः संस्कृतभाषायाः अध्ययनम् अकुर्वन्। डॉ. मिहिरः उपाध्यायः छात्रेभ्यः मार्गदर्शनं प्रायच्छत्।

## कृपया हसन्तु

रमणः - (नमनं प्रति) एते 'वाघ-बकरी' इति चायस्य विक्रेतारः किं विचिन्त्य चायस्य नाम 'वाघ-बकरी' इति स्थापितवन्तः स्युः ।

नमनः - प्रातः एकत्र उपविश्य चायं पिबन्तौ दम्पती दृष्ट्वा एव एते स्वस्य चायस्य नाम 'वाघ-बकरी' इति स्थापितवन्तः ।

★ ★ ★ ★ ★

नमनस्य मिष्टान्नस्य आपणः आसीत् । किन्तु सः स्वापणे- "आलुकं स्वीकुर्वन्तु... आलुकम्.." इति उच्चैः उद्घोषयन् आसीत् । एतत् श्रुत्वा कश्चन ग्राहकः अवदत्- "किन्तु अत्र तु मिष्टान्नम् अस्ति ।" एतत् श्रुत्वा नमनः अवदत् - "तूष्णीं तिष्ठ ! अन्यथा मक्षिकाः आगमिष्यन्ति ।"

★ ★ ★ ★ ★

कक्ष्यायाः समाप्तेः अनन्तरम्....

शिक्षकः - (छात्रान् उद्दिश्य) किमपि प्रष्टुम् इच्छन्ति चेत् भवन्तः प्रष्टुं शक्नुवन्ति ।

नमनः - आचार्य ! भवान् कं विषयं पाठयन् आसीत् ?

★ ★ ★ ★ ★

पत्नी - (पतिम् उद्दिश्य) पाकशालातः आलुकानि आनयतु भोः ।

पतिः - सर्वत्र अन्वेषणं कृतवान् किन्तु आलुकं कुत्रापि न दृश्यते ।

पत्नी - अहं पूर्वमेव जानामि स्म यत् भवान् किमपि कर्तुं न शक्ष्यति, अतः अहं पूर्वमेव सर्वाणि आलुकानि आनीतवती आसम् ।

## सुभाषितम्

– संस्कृतविकिपीडियाजालस्थानात्

**धर्मादर्थः प्रभवति धर्मात् प्रभवते सुखम् ।**
**धर्मेण लभते सर्वं धर्मसारमिदं जगत् ॥**

**तात्पर्यम्** – धर्मात् धनं वर्धते। धर्मात् सुखस्य अपि वृद्धिः भवति। धर्मेण व्यवह्रियते चेत् सर्वमपि प्राप्यते। एवम् इदं जगत् धर्मसारभूतं विद्यते।

**धीराः शोकं तरिष्यन्ति लभन्ते सिद्धिमुत्तमाम् ।**
**धीरैः सम्प्राप्यते लक्ष्मीः धैर्यं सर्वत्र साधनम् ॥**

**तात्पर्यम्** – धीराः महदपि दुःखं सहन्ते । श्रेष्ठां सिद्धिं प्राप्नुवन्ति । ऐश्वर्यमपि प्राप्नुवन्ति । धैर्यं सर्वत्र साधनमस्ति।

**धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।**
**धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥**

**तात्पर्यम्** – धैर्यं, क्षमा, बाह्येन्द्रियनिग्रहः, बुद्धिः, विद्या, सत्यं, शान्तिः – एते दश धर्मस्य लक्षणानि।

**न दैवमिति सञ्चिन्त्य त्यजेदुद्योगमात्मनः ।**
**अनुद्यमेन कस्तैलं तिलेभ्यः प्राप्तुमर्हति ॥**

**तात्पर्यम्** – सर्वं दैवाधीनमिति विचिन्त्य प्रयत्नम् अकुर्वद्भिः न उपवेष्टव्यम्। प्रयत्नेन विना तिलात् तैलं न प्राप्यते।

## ज्ञानसरित्

श्यामः पटेलः



**पक्षिणां पिच्छेषु कुतूहलम्** –मयूरपिच्छं सुन्दरतायाः मृदुतायाश्च प्रतीकम् अस्ति। पक्षिणां पिच्छानि दर्शनीयानि तु भवन्ति एव। तेषां स्पर्शोऽपि रोमाञ्चकः भवति। पिच्छं खगानाम् उपयोगि अङ्गम् अस्ति। यथा मनुष्येषु पशुषु च नखकेशादिकं भवति तथा पक्षिषु पिच्छानि भवन्ति। एतानि पिच्छानि एव पक्षिभ्यः रङ्गं रूपं च ददति। किन्तु पिच्छानि कुतः निर्मितानि? अद्य तज्ज्ञातुं यतामहे।

बीटा-केरिटिन-द्रव्यतः पिच्छानां निर्माणं भवति। उड्डयितुं तु पिच्छानि अपेक्ष्यन्ते किन्तु शैत्यात् घर्मात् तथा च अल्ट्रा-वायोलेट-किरणेभ्यः आत्मानं रक्षितुमपि पिच्छानि आवश्यकानि। किन्तु सर्वासां पक्षिप्रजातीनां पिच्छानां रचना विभिन्ना भवति। तेषां रचनायां शलाका इव एकां धुरिकाम् उभयतः मृदवः तन्तवः समानरूपेण भवन्ति। सा धुरिका पक्षिणः शरीरेण सह युक्ता भवति। पिच्छस्य एषा धुरिका उपरिभागात् मृदुभिः तन्तुभिः मृद्वी भवति किन्तु मूले यष्टिका इव दृढा भवति।

पक्षिणां शरीरस्योपरि प्रथमस्तरे लघूनां पिच्छानाम् आवरणं भवति। तानि पिच्छानि एव शैत्यात् घर्मात् च रक्षणं प्रददति। तेषां पुच्छेषु द्वित्राणि दीर्घाणि पिच्छानि भवन्ति। महत् आश्चर्यं तु तद् अस्ति यत् विभिन्नरङ्गैः रञ्जितानि पिच्छानि दृश्यन्ते तेषु रङ्गाः एव न भवन्ति। तत्र कोषिकानां व्यवस्था तादृशी भवति यतः ताः कोषिकाः रङ्गानां परावर्तनं कुर्वन्ति। येन वयं तानि पिच्छानि रङ्गयुक्तानि पश्यामः।

पिच्छम् – feather

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **परस्तात्** | परे | beyond |
| **विवर्तः** | नृत्य | whirling/dancing |
| **निवत्** | घाटी | valley |
| **सन्नहनम्** | सज्ज होना | equipping oneself |
| **तुन्दिलः** | तोंदवाला | fat-bellied |
| **आकुलः** | आकुलित होना | agitated |
| **ष्ठीवनम्** | थूकना | spitting |
| **कल्लोलः** | तरंग | waves |
| **कोलाहलः** | कोलाहल | commotion |
| **पलितम्** | धुमैला | grey |
| **पञ्चबाणः** | कामदेव | Kamdev |
| **प्रलापः** | बक-बक करना | talk |
| **वारिवाहः** | मेघ | cloud |
| **सूरः** | सूर्य | sun |

## किं भवन्तः जानन्ति ?

**१) एतेषु कः देवः 'मृत्युञ्जयः' इति सञ्ज्ञया विभूषितः वर्तते?**
(क) अग्निः (ख) विष्णुः (ग) शिवः (घ) कामः

**२) असुराणां गुरुः कः आसीत्?**
(क) शुक्राचार्यः (ख) कृपाचार्यः (ग) द्रोणाचार्यः (घ) शङ्कराचार्यः

**३) देवानां गुरुः कः आसीत्?**
(क) बृहस्पतिः (ख) शुक्रः (ग) विश्वामित्रः (घ) धौम्यः

**४) गौतमबुद्धस्य पूर्वतनं नाम किम् आसीत्?**
(क) शुद्धोदनः (ख) राहुलः (ग) सिद्धार्थः (घ) वर्द्धमानः

**५) जैनधर्मस्य प्रथमः तीर्थङ्करः कः आसीत्?**
(क) महावीरः (ख) अजितनाथः (ग) सम्भवनाथः (घ) ऋषभदेवः

**६) भगवतः महावीरस्य बाल्यकालस्य नाम किम् आसीत्?**
(क) सिद्धार्थः (ख) वर्द्धमान् (ग) सोमप्रभः (घ) चन्द्रप्रभः

**७) गुरुनानकदेवस्य बाल्यकालस्य नाम किम् आसीत्?**
(क) नानकरामः (ख) नानकचन्दः (ग) लहणा (घ) मरदाना

उत्तराणि – (१) ग (२) क (३) क (४) ग (५) घ (६) ख (७) ख

# अस्माकम् आगामिकार्यक्रमा:

EKLAVYA SANSKRIT ACADEMY
|| जयतु संस्कृतं जयतु भारतम् ||

**Online / Offline**

## Admission Open

# संस्कृतभाषाशिक्षणम्

### First Level

**Date :** 5/6/23 to 28/8/23
**Day :** Mon-Wed-Fri
**Time :** 6:30pm to 8:00pm
**Fees :** 6000/-

### Second Level

**Date :** 6/6/23 to 28/9/23
**Day :** Tue-Thur
**Time :** 7:00am to 8:30am
**Fees :** 6000/-

**contact: Dr Mihir Upadhyay, 98246 16237**

**Online**

# संस्कृतभाषाशिक्षणम्

### Forth Level

**Date :** 6/6/23 to 28/8/23
**Day :** Mon-Wed-Fri
**Time :** 7:00am to 8:30am
**Fees :** 7000/-

## Admission Open 2023-24

**Value Education Through Sanskrit**

# बालसंस्कृतवर्ग:

**(Class SKg to 8)**
**Online / Offline**

**Date :** 11/6/23 to 24/3/24
**Day :** Sunday
**Time :** 11:00am to 12:30pm (IST)
**Fees :** 7000/-

**contact: Dr Mihir Upadhyay, 98246 16237**

संस्कृत-
## साम्प्रतम्

नमस्कार:
यदि भवन्त: "साम्प्रतम्" मासिकीपत्रिकाया: ग्राहका: भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

### ग्राहक शुल्कम्

| | |
|---|---|
| वार्षिकं रू | – 100 |
| द्वैवार्षिकं रू | – 175 |
| त्रैवार्षिकं रू | – 250 |
| अङ्कमूल्यं रू | – 10 |

**प्रियवाचका:**
- **भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्या: लेखा:, कथा:, हास्यकणिका: वा सन्ति तर्हि कृपया प्रेषयन्तु ।**
- **पत्रिकाया: विषये सूचनम् अपि स्वीकार्यम् अस्ति ।**

EKLAVYA SANSKRIT ACADEMY
|| जयतु संस्कृतं जयतु भारतम् ||

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006